International Journal of Sanskrit Research 2021; 7(5): 338-342

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(5): 338-342
© 2021 IJSR
www.anantaajournal.com
Received: 23-07-2021
Accepted: 27-08-2021

**अशोकमण्डलः**
शोधच्छात्रः, साहित्यविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीसदाशिवपरिसरः, पुरी,
ओडिसा, भारत

**Corresponding Author:**
**अशोकमण्डलः**
शोधच्छात्रः, साहित्यविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीसदाशिवपरिसरः, पुरी,
ओडिसा, भारत

# काव्यात्मविचारे औचित्यस्य स्थानम्

**अशोकमण्डलः**

**शोधसंक्षिप्तिका**

काव्यस्योत्कर्षविधायं किं तत्त्वं काव्यस्यात्मा? अमुं विषयमधिकृत्य अलङ्कारशास्त्रे आलङ्कारिकेषु विविधा मतभेदा जायन्ते। तत्र एकादशशताब्द्या उत्तरकाले प्रादुर्भूतस्य क्षेमेन्द्रस्य मते औचित्यमेव काव्यस्य जीवितमेव। "औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्" इति वचनाद् औचित्यमधिकृत्य तेन औचित्यविचारचर्चा नामको ग्रन्थः प्रणीतः। उचितस्य भाव औचित्यम्। पदवाक्यप्रबन्धार्थगुणालङ्काररसक्रियाकारणलिङ्गवचनकालदेशमधिकृत्य तेन औचित्यानि सलक्षणमुदाहृतानि। भरतेन औचित्यविषये प्रथमतो निर्देशः कृतः। तस्यैव विशदीकरणमानन्दवर्धनेन ध्वन्यालोकग्रन्थे कृतम्। अस्मिन् शोधपत्रे काव्यात्मविचारे औचित्यस्य स्थानं किमस्ति, तस्मिन् विषयेऽत्र समासेन समुपस्थाप्यते।

**प्रधानसंसूचकानि—** क्षेमेन्द्रमते औचित्यम्, औचित्यस्य संज्ञा, आनन्दवर्धनमते औचित्यम्, भरतमुनिमते औचित्यम्, प्रसिद्धानामालङ्कारिकाणां मते औचित्यम्।

## भूमिका

कृतारिवञ्चने दृष्टिर्येनाञ्जनमलीमसा।
अच्युताय नमस्तस्मै परमौचित्यकारिणे॥ [1]

शब्दार्थोभयप्रधानस्य काव्यस्य नानातत्त्वानि विमर्शयन्तो भारतीयकाव्यतत्त्वमीमांसका भामहादारभ्य पण्डितराजजगन्नाथपर्यन्ताः काव्यात्मनिरूपणे परस्परं विवदन्त्येव परिदृश्यते।

[1] औचित्यविचारचर्चा १

सर्वविदितमस्ति यत्— काव्यमीमांसाकारो राजशेखरः काव्यं पुरुषत्वेन परिकल्प्य तस्य ऐतिह्यं विज्ञापितम्। कैश्चित् कवितायां कान्तात्वमपि समारोपितम्। अतः काव्यपुरुषस्य कविताकामिन्या वा केनचिदात्मना भाव्यम्। वस्तुत एतादृशं किं तत्त्वं प्रधानमस्ति येन काव्यस्याऽऽधानां जायते—इत्येतस्याः समस्यायाः समाधानार्थमनेके आलङ्कारिकाः स्व स्व मतं प्रकटितवन्तः। तेषु केचनालङ्कारमेव काव्यस्य जीवनं मन्यन्ते स्म, तदितरे गुणान्, अन्ये तद् रीतिं, तदपरे ध्वनिं, अपरे केचन वक्रोक्तिः, अन्ये तु रसं, केचन औचित्यञ्च काव्यस्य प्राणभूतत्त्वेन विचारयन्ति स्म। काव्यस्यात्मनमधिकृत्य सञ्जातायाः समीक्षाया विभिन्नता नवनवसम्प्रदायान् समुत्पादयामास। तद्यथा- "काव्यस्यात्मालङ्कारः" इति भामहः, "रीतिरात्मा काव्यस्य" इति वामनः, "काव्यस्यात्मा ध्वनिः" इति आनन्दवर्धनः, "वक्रोक्तिः काव्यजीवितम्" इति कुन्तकः, "औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्" इति क्षेमेन्द्रः, "रसः काव्यस्यात्मा" इति भरतो विश्वनाथकविराजश्च। एतेषु मतषट्केषु मदीयो विचारणीयो विषयो वर्तते "काव्यात्मविचारे औचित्यस्य स्थानम्" इति।

### क्षेमेन्द्रमते औचित्यम्

संस्कृतवाङ्मये औचित्यशब्दस्य प्रयोगोऽतिप्राचीनादेवकालात् प्रवृत्तो वर्तते। अस्मिन् वाङ्मये साहित्यालोचनस्य जगतः औचित्यतत्त्वं महदवदानमास्ते। औचित्यस्य भावना ध्वन्यादि समस्तकाव्यतत्त्वानां मूलभावना विद्यते। अयं हि काव्यशास्त्रस्य व्यापकतमः सिद्धान्तो वर्तते। सर्वे प्राचीनालङ्कारिका हि स्व स्व ग्रन्थे औचित्यरक्षणायै सङ्केतं निर्दिष्टवन्तः। तानेव पूर्वग्रन्थानालोच्य काव्यतत्त्वस्य व्यापकरूपमादातुं क्षेमेन्देण औचित्यविचारचर्चानामके ग्रन्थे औचित्यमेव काव्यस्य जीवातुतत्त्वरूपेण ग्रथितः। रसस्य जीवनभूतः प्राणः औचित्यमेवेत्युक्त्वा तेन स्पष्टं समुद्घोषितम्—

औचित्यस्य चमत्कारकारिणश्चारुचर्वणे।
रसजीवितभूतस्य विचारं कुरुतेऽधुना॥[2]

### औचित्यस्य संज्ञा

किमिदमौचित्यम् ? इति जिज्ञासायामुच्यते यत् – यो यत्सदृशः, येन परस्परं सम्मिश्रणं सम्मिलनं वा भवेत् तदेवोचितम्। अथ चोचितस्य भाव औचित्यम् (उचितशब्दे ष्यञ्-प्रत्यये औचित्यपदं निष्पन्नम्)। यदुक्तं क्षेमेन्द्रेण—

उचितं प्राहुराचार्याः सदृशं किल यस्य यत्।
उचितस्य च यो भावस्तदौचित्यं प्रचक्षते॥[3]

इदमौचित्यमेव अलङ्कारस्य अलङ्कारत्वं, गुणानां गुणत्वं तथा च रसस्य प्राणस्वरूपत्वम्। यदुक्तमौचित्यविचारचर्चाग्रन्थकारेण—

अलङ्कारास्त्वलङ्कारा गुणा एव गुणाः सदा।
औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्॥[4]

अतएव अलङ्कारस्य अलङ्कारत्वं गुणानां गुणत्वं स्वीकृत्य एते काव्यस्य साधारणबाह्याङ्गरूपेण स्वीकृताः। किन्तु काव्यस्यात्मभूतस्य रसस्य ग्राह्यत्वे मूलं तु औचित्यमेव। भरतमुनिप्रभृतिप्राचीनाचार्यान् अनुसृत्यैव क्षेमेन्द्रेण लिखितम्—

उचितस्थानविन्यास्यादलङ्कृतिरलङ्कृतिः।
औचित्यादच्युता नित्यं भवन्त्येव गुणा गुणाः॥[5]

इदञ्च औचित्यं काव्यस्य प्रत्येकमङ्गे समपेक्षितम्। यत्रैव तस्याभावः स्यात् तत्रैव रसभङ्गो भवेत्। अतः क्षेमेन्दमते काव्यस्य पदे, वाक्ये,

---

[2] तत्रैव – ३

[3] तत्रैव – ७

[4] तत्रैव ५

[5] तत्रैव ६

प्रकरणे, प्रबन्धार्थे, गुणे, अलङ्कारे, रसे, क्रियायां, कारके, लिङ्गे, वचने, विशेषणे, उपसर्गे, निपाते, काले, देशे, कुले, व्रते, तत्त्वे, अभिप्राये, स्वभावे, सारसंग्रहे, प्रतिभायाम्, अवस्थायां, विचारे, नाम्नि, आशीर्वादे चेति सप्तविंशतौ अङ्गेषु विशेषतः सुकविना औचित्यं प्रदर्शनीयम्।

**आनन्दवर्धनमते औचित्यम्**

औचित्यस्य मूलतत्त्वमानन्दवर्धनेनैवोद्घाटितम्। तेनैव ध्वन्यालोके नामके ग्रन्थे औचित्यस्य गरिम्णः पूर्णतया विवेचनं कृतम्। तेन रसभङ्गस्य व्याख्याया अवसरेऽभिहितम्—

> अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम्।
> प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परा॥[6]

औचित्यस्य व्यापकमहत्त्वप्रतिपादनपरेण आनन्दवर्धनेन बहुविधानि औचित्यानि वर्णितानि, यानि कविप्रतिभायाः कार्याणि। रसौचित्यम्, गुणौचित्यम्, अलङ्कारौचित्यम्, संघटनौचित्यम्, प्रबन्धौचित्यम्, वृत्तेः औचित्यम्, कविप्रतिभात्मकनाट्येषु काव्येषु गद्येषु पद्येषु विषयगतौचित्यं प्रति कविना यत्नः करणीयः।

**भरतमुनिमते औचित्यम्**

काव्यस्येदं मूलतत्त्वं ध्वन्यालोककारात् पूर्वमेव व्यवहाररूपेणाऽङ्गीकृतमासीत् भरतमुनिना नाट्यशास्त्रे। तन्मतानुसारं 'लोकानुवृत्तकरणं नाट्यमिति'। लोके यद्वस्तु येन रूपेण, येन वेषेन, यया मुद्रया च समुपलभ्यते तस्य वस्तुनः तेनैव रूपेण वेषेण च तथैव मुद्रया अनुकरणं नाट्यस्य चरमं लक्ष्यम्। एतस्मादेव कारणात् नाट्यशास्त्रं प्रकृतेः भाषा-वेषादीनां विधानेऽत्यधिकं बलं प्रयच्छति। अतो भरतमुनिना नाट्ये पात्रेभ्यः देशस्यावस्थायाश्चानुरूपेण वेषविन्यासस्योपदेशं दत्त्वैतत्तत्त्वोपर्यैव विशेषाग्रहः प्रदर्शितः। तद्यथा—

> लोकसिद्धं भवेत् सिद्धं नाट्यं लोकस्वभावजम्।
> तस्मान्नाट्यप्रयोगे तु प्रमाणं लोक इष्यते॥[7]
> वयोऽनुरूपः प्रथमस्तु वेषो वेषानुरूपस्तु गतिप्रचारः।
> गतिप्रचारानुगतं च पाठ्यं पाठ्यानुरूपोऽभिनयश्चकार्यः॥[8]
> अदेशजो हि वेषस्तु न शोभां जनयिष्यति।
> मेखलोरसि बन्धे च हास्यायैवोपजायते॥[9]

अस्यैव पल्लवीकरणं कुर्वताऽऽचार्याक्षेमेन्द्रेणाऽपि समुद्धृतम्—

> कण्ठे मेखलया नितम्बफलके तारेण हारेण वा,
> पाणौ नूपुरबन्धनेन चरणे केयूरपाशेन वा।
> शौर्येण प्रणते रिपौ करुणया नायान्ति के हास्यता-
> मौचित्येन विना रुचिं प्रतनुते नालङ्कृतिर्नो गुणाः॥[10]

**प्रसिद्धानामालङ्कारिकाणां मते औचित्यम्**

आचार्यभरतादनन्तरं दण्डि-भामहादयो यद्यपि प्रत्यक्षरूपेण औचित्यं न विवेचितवन्तः, परन्तु काव्ये दोषरूपेण अनौचित्यं परिहर्त्तुं वाञ्छन्ति। आचार्यदण्डिमते एकेनापि दुष्टपदप्रयोगेण काव्यस्य अनुत्कर्षो भवति। अतः तेनोक्तं यत् "स्याद्वपुः सुन्दरमपि स्वित्रेणैकेन दुर्भगम्"[11] इति। दण्डि भामहकृतदोषपरिहारविवेकः औचित्येन सह परम्परया सम्बन्धितः। भट्टलोल्लटमते शास्त्रीयपरिवेशे रसस्य औचित्यम्, अलङ्कारस्य औचित्यम्, वृत्तीनाम् औचित्यं निरूपणीयम्।

---

[6]ध्वन्यालोकः, जगन्नाथपाठकः, चौखम्बा विद्याभवनम्, वाराणसी २०११, पृष्ठसंख्या ३६२

[7]नाट्यशास्त्रम् – २६/११३

[8] तत्रैव १४/६८

[9] तत्रैव २३/६९

[10]औचित्यविचारचर्चा – ६

[11] काव्यादर्शः १/७

एवमेव आचार्येण भर्तृहरिणा वाक्यपदीये शब्दार्थविचारप्रसङ्गे काव्यस्यौचित्यतत्त्वं समुपस्थापितम्। तद्यथा—

वाक्यात् प्रकरणादर्थादौचित्याद्देशकालतः।
शब्दार्थाः प्रविभज्यन्ते न रूपादेव केवलात्॥ [12]

एतत्सर्वं सङ्कलयन् यशोवर्मा रामाभ्युदयनाटके प्रतिपादयामास—

औचित्यं वचसां प्रकृत्यनुगुणं सर्वत्र पात्रोचिता
पुष्टिः स्वावसरे रसस्य च कथामार्गे न चातिक्रमः।
शुद्धिः प्रस्तुतसंविधानकविधौ प्रौढश्च शब्दार्थयोः
विद्वद्भिः परिभाष्यतामवहितैरेतावदेवास्तु नः॥

काव्ये औचित्यं कथं प्रजायते, तस्योपायं प्रदर्श्य अग्निपुराणे प्रतिपादयति महर्षिव्यासदेवः—

यथावस्तु तथा रीतिर्यथा वृत्तिस्तथा रसः।
ऊर्जस्विमृदुसन्दर्भादौचित्यमुपजायते॥ [13]

काव्यमीमांसाकारेण राजशेखरेण तु 'उचितानुचितविवेको व्युत्पत्तिः। रसोचितशब्दार्थसूक्तिनिबन्धनः पाकः' इति संक्षिप्तनिर्देशेन काव्ये औचित्यस्य महत्त्वमङ्गीकृतम्। आचार्यकुन्तकेनाऽपि 'वक्रोक्तिजीवितम्' इति ग्रन्थे विविधानां कविव्यापारवक्रत्वप्रकाराणां निरूपणप्रसङ्गे मुक्तकण्ठेन काव्ये औचित्यस्य महत्त्वं, विच्छित्तिजनकत्वञ्च प्रदर्शितम्। तत्र काव्यस्य वर्णपदवाक्यादिविभिन्नेषु यदौचित्यमपेक्षितं तदेव पदादीनां वक्रत्वमिति तस्य प्रतिपादितदिशा विज्ञायते। यथा "तत्र पदस्य तावदौचित्यं बहुविधभेदभिन्नो वक्रभावः" [14] इत्यादिकथनेषु औचित्यं वक्रत्वञ्चेत्युभयमेकरूपमेवेति अवगम्यते।

भोजराजस्य सरस्वतीकण्ठाभरणे शृङ्गारप्रकाशे, धनञ्जयस्य दशरूपके, मम्मटस्य काव्यप्रकाशे च "प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परा" आनन्दवर्धनाचार्यस्यैव पदध्वनिः श्रूयते। एवंरूपेण ज्ञायते यत्—समेषामाचार्याणां मते काव्ये औचित्यं सर्वथा काम्यं तथा तद्विधानं परमावश्यकमिति निश्चीयते।

एवं पूर्ववर्तिनामाचार्याणामौचित्यविषयकमतानि समवलोक्य, समीक्ष्य, अनुसन्ध्याय च क्षेमेन्द्रः स्वकीये ग्रन्थे औचित्यविचारचर्चामकरोत्। अतः तत्त्वमिदं क्षेमेन्द्रस्य नैव प्रथमचिन्तनम्। आचार्याभिनवगुप्तस्यैवेकः प्रमुखः शिष्यः क्षेमेन्द्रः, स स्वयमेव ध्वनिवाद्यासीत्। तथापि स 'औचित्यविचारचर्चा'ऽभिधस्य ग्रन्थस्य माध्यमेन "औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्" इति सिद्धान्तयन् औचित्यमेव सर्वातिशायितत्त्वमिति मनुते। अन्ततो गत्वा तेनोक्तं यत् – औचित्यं विना अलङ्काराणां गुणानाञ्च स्थितिर्नास्तीति।

**उपसंहारः –**

एवं सर्वविदिततथ्यमेतद्यदौचित्यं रचनाप्रक्रियायां प्राथमिकं तत्त्वम्। प्रत्येकं वस्तुनः अङ्गोपाङ्गानाञ्च औचित्यपूर्णं वर्णनं स्वाभाविकतामानयति। आचार्यभरताऽऽनन्दवर्धनादिषु औचित्यं मूलत्वेन तु वर्तते, परं तत् क्षेमेन्द्रेण पल्लवितं पोषितं काव्यसिद्धान्तत्वेन च प्रतिष्ठापितम्। उपर्युक्तप्रकारेण औचित्यस्य महत्त्वे व्यापकत्वे च सिद्धेऽपि तस्य काव्ये आत्मत्वं सिद्धं न भवति। अत्रापि प्रश्न उत्तिष्ठते यदिदमौचित्यं स्वयं साधनं साध्यं वा। रसादेरानन्दात्मकानुभूतये रसादीनामौचित्यपूर्णविधानं भवति, उताहो औचित्यस्य चमत्काराय रसादीनां विधानं भवति। साध्यं रसादिः अथवा औचित्यम् ?

अस्योत्तरे कथ्यते यत्– रसानुभूतये एव रसादीनां सर्वेषामौचित्यपूर्णविधानं भवति। आचार्याभिनवगुप्तेन लोचनटीकायां समुद्धृतं यत्—"उचितशब्देन रसविषयमौचित्यं भवतीति दर्शयन् रसध्वनेः काव्यजीवितत्वं सूचयति। तदभावे हि

[12] वाक्यपदीयम् – २/३१५

[13] अग्निपुराणम् – ३४५/५

[14] वक्रोक्तिजीविते १/५० कारिकायाः वृत्तिः।

किमपेक्षया इदमौचित्यं नाम सर्वत्रोद्घोष्यते।"[15] इत्येवं प्रतिपादयन् सन्देहनिमीलितलोचनानां लोचनानि समुन्मीलयति। स्वयं हि क्षेमेन्द्रः "रससिद्धस्य काव्यस्य औचित्यं स्थिरं जीवितं भवती"ति कथयन् रसादिना सिद्धे काव्ये औचित्यं साधयतीति स्पष्टयति। अतः औचित्यं साधनरूपेण विच्छित्तिं समुत्पादयति न तु साध्यरूपेण पर्यवस्यति।

एवंप्रकारेण उपर्युक्तपर्यालोचनयावगम्यते यत्—काव्यतत्त्वमिदमौचित्यं काव्यस्य कृते परमप्रयोजनीयम्, परं तेषामात्मत्वे स्वीकारेऽस्ति विदुषां विप्रतिपत्तिः।

**सहायकग्रन्थसूची**


1. औचित्यविचारचर्चा, आचार्य श्रीव्रजमोहन झा (व्याख्याकारः), चौखम्बा विद्याभवनम्, वाराणसी २०१३
2. औचित्यविचारचर्चा, डा. सीहेच्. नागराजु (व्याख्याकारः), चौखम्बा संस्कृत पुस्तकालयः, वाराणसी २०१८
3. साहित्यवल्लरी, डा. एन्. लक्ष्मीनारायणभट्टः, राष्ट्रिय संस्कृत संस्थानम्, नवदेहली २०११
4. अलङ्कारशास्त्रस्येतिहासः, प्रो. केतकीनायकः (लेखिका), सांविदीप्रकाशनम्, पुरी २०१२
5. संस्कृतकाव्यशास्त्रेतिहासः, आचार्य जगदीशचन्द्र मिश्रः, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी २०१५
6. अलङ्कारशास्येतिहासः, डा. जगदीशचन्द्रमिश्रः, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी २०१७


[15] ध्वन्यालोकस्य ३/१४ कारिकायाः लोचनटीका।